This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ ॥नारदउवाच॥भगवन्श्रोतुमिच्छामि
किंमंत्रंभगवान्भवः॥कृपयापर्शुरामायकिंस्तोत्रंकवचंददौ
॥कोवास्यमंत्रस्याराध्यःकिंफलंकवचस्यच॥स्तवनस्यफलं
वाकिंतद्भवान्वक्तुमर्हसि॥श्रीनारायणउवाच॥मंत्राराध्यो
हिभगवान्परिपूर्णतमःस्वयं॥गोलोकनाथःश्रीकृष्णोगोप ॥१॥

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1818
Dist Nagpur

Acc No. ~~1555~~ M-1818
Title - नारायणनारदसंवाद (ब्रह्मवैवर्त पुराण)
Author - व्यास.
Date - शके 1690
Subject - स्तोत्र
folio - 19
Xerox - 19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोपीश्वरः प्रभुः ॥ त्रैलोक्यविजयं नाम कवचं परमाद्भुतं ॥ स्तवरा
जं महापुण्यं विभूतियोगसंभवं ॥ मंत्रं कल्पतरुं नाम सर्वकामफ
लप्रदं ॥ प्रददौ पर्शुरामाय रत्नपर्वतसन्निधौ ॥ स्वयंप्रभानदी
तीरे पारिजातवनांतरे ॥ आश्रमे लोकदेवस्य माधवस्य च मस्त
के ॥ श्रीमहादेव उवाच ॥ वत्सागच्छ महाभाग भृगुवंशसमुद्भ

व ॥ पुत्राधिकोसि प्रेम्णा मे कवचग्रहणं कुरु ॥ शृणु राम प्रवक्ष्यामि
ब्रह्मांडे परमाद्भुतं ॥ त्रैलोक्यविजयं नाम श्रीकृष्णस्य जयावहं ॥
श्रीकृष्णेन प्रियो दत्तं गोलोके राधिकाश्रमे ॥ रासमंडलमध्ये च
मंत्रं वृंदावने वने ॥ अतिगुह्यतरं तत्वं सर्वमंत्रौघविग्रहं ॥ पुण्या ॥२॥
त्पुण्यतरं चैव परं स्नेहाद्ददामि ते ॥ यद्धृत्वा पठनाद्देवी मूलप्रकृति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीश्वरी॥शुंभंनिशुंभंमहिषंरक्तबीजंजघानह॥यद्दत्ताकूर्म्मरा
जश्चशेषंधत्तेचलीलया॥यद्दत्ताभगवान्वायुर्विश्वाधारोविभुः
स्वयं॥यद्दत्तावरुणःसिद्धःकुबेरश्चधनेश्वरः॥यद्दत्तापग्गना
दिंद्रोदेवानामधिपःस्वयं॥यद्दत्ताभातिभुवनेतेजोराशिःस्वयं
विधिः॥यद्दत्तापग्गनाच्चंद्रोमहाबलपराक्रमः॥अगस्त्यःसा

गरान्सप्तयद्दत्तापग्गनात्पपौ॥चकारतेजसाजीर्णंदैत्यंवातापि
संज्ञकं॥यद्दत्तापग्गनाद्देवीसर्वधारावसुंधरा॥यद्दत्तापग्गना
त्सूताङ्गंगाभुवनपावनी॥यद्दत्ताजगतांसाक्षीधर्मोधिर्मभृतांव
रः॥सर्वविद्याधिदेवीसायच्चध्यत्तासरस्वती॥यद्दत्ताजगतांल ॥३॥
क्ष्मीरत्नदात्रीपरात्परा॥यद्दत्तापग्गनाद्देदान्सावित्रीप्रसुसाव

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ वेदाश्चधर्मवक्तारोयद्भक्त्यापगनाद्भगो॥ यद्भक्त्यापगनात् श्रुद्ध
स्तेजस्वीहव्यवाहनः॥ सनत्कुमारोभगवान् यद्भक्त्याज्ञानिनांबरः
॥ दातव्यंकृष्णभक्ताय साधवेचमहात्मने॥ शठायपरशिष्यायद
त्वामृत्युमवाप्नुयात्॥ त्रैलोक्यविजयस्यास्यकवचस्यप्रजाप
तिः॥ ऋषिश्छंदश्चजगतीदेवोरासेश्वरः स्वयं॥ त्रैलोक्यविजय

प्राप्तोविनियोगः प्रकीर्त्तितः॥ परात्परंचकवचंत्रिषुलोकेषुदुर्लभं
॥ प्रणवोमेशिरः पातुश्रीकृष्णायनमः सदा॥ पायात्कपालंकृ
ष्णायस्वाहेतिपंचमाक्षरः॥ कृष्णेतिपातुनेत्रेचकृष्णस्वाहेति
तारकां॥ हरयेनमइत्येवंभ्रूलतांपातुमेसदा॥ ॐ गोविंदाय ॥४॥
स्वाहेतिनासिकांपातुसंततं॥ गोपालायनमोगंडौपातुमेसर्वतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदा॥ क्लीं कृष्णायनमः कर्णौपातु कल्पतरुर्मम॥ ॐ कृष्णायनमः
शाश्वत्पातुमे कर युग्मकं॥ ॐ गोविंदायस्वाहेति कंठं मे पातुस
र्वतः॥ नमोगोपांगनेशायवक्षः पातुसदामम॥ ॐ गोपेशाय
स्वाहेतिस्कंधंपातुसदामम॥ नमः किशोरवेशायस्वाहापृष्ठंस
दावतु॥ उदरं पातुमेनित्यंमुकुंदायनमःसदा॥ ह्रीं क्लीं कृष्णा

यस्वाहेतिकरौपातुसदामम॥ ॐ विष्णवे नमोबाहुयुग्मंपातुसदा
मम॥ ॐ ह्रीं भगवते स्वाहा नखरं पातुमेसदा॥ ॐ नमोनाराय
णायेति नखरंध्रंसदावतु॥ ॐ श्रीं ह्रीं पद्मनाभायनाभिंपातु
सदामम॥ ॐ सर्वेशायस्वाहेति कंकालंपातुमेसदा॥ ॐ गोपी
रमणायस्वाहानितंबंपातुमेसदा॥ गोपीनांप्राणनाथायपादौ ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पातुसदाममः॥ॐ केशवायस्वाहेतिममकेशान्सदावतु॥ नमः
कृष्णायस्वाहेतिब्रह्मरंध्रंसदावतु॥ ॐ माधवायस्वाहेतिलोमा
×रसिकेशाय× निचसदावतु॥ ॐ क्लीं श्रीं ह्रँ विकेशायँ स्वाहासर्वंसदावतु॥ प
रिपूर्णतमः कृष्णः प्राच्यांमांसर्वदावतु॥ स्वयंगोलोकनाथोमामा
ग्नेय्यांदिशिरक्षतु॥ पूर्णब्रह्मस्वरूपश्चदक्षिणेमांसदावतु॥

नैऋत्यांपातुमांकृष्णः पश्चिमेपातुमांहरिः॥ गोविंदः पातुमांशश्वत्
वायव्यांदिशिनित्यशः॥ उत्तरेमांसदापातुरसिकानांशिरोमणिः
॥ ऐशान्यांमेसदापातुवृंदावनविहारकृत्॥ वृंदावनीप्राणना
थः पातुमामूर्द्ध्वदेशतः॥ सदैवमाधवः पातुबलीहारीमहाब ॥६॥
लः॥ जलेस्थलेचांतरिक्षेन्टसिंहः पातुमांसदा॥ स्वप्नेजागरणे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाश्वत्पातुमांमाधवः स्वयं ॥ सर्वांतरात्मानिर्लिप्तोरक्षमांसर्वतोवि
भुः ॥ इतितेकथितंवत्ससर्वमंत्रौघविग्रहं ॥ त्रैलोक्यविजयंनाम
कवचंपरमाद्भुतं ॥ मयाश्रुतंकृष्णवक्त्रात्प्रवक्तव्यंनकस्यचित् ॥
गुरुमभ्यर्च्यविधिवत् कवचंधारयेत्तुयः ॥ कंठेवादक्षिणेबाहौ
सोपिविष्णुर्नसंशयः ॥ सचभक्तोवसेद्यत्रलक्ष्मीर्वाणीवसेत्ततः ॥

यदिस्यात्सिद्धकवचोजीवन्मुक्तोभवेत्तुसः ॥ निश्चितंकोटिवर्ष
णांपूजायाः फलमाप्नुयात् ॥ राजसूयसहस्राणिवाजपेयशता
निच ॥ अश्वमेधायुतान्येवनरमेधायुतानिच ॥ महादानानिया
न्येवप्रादक्षिण्यंभुवस्तथा ॥ त्रैलोक्यविजयस्यास्यकलांना ॥७॥
र्हंतिषोडशीं ॥ व्रतोपवासनियमः स्वाध्यायोध्ययनंतपः ॥ स्ना

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंचसर्वतीर्थेषुनास्यार्हंतिकलामपि॥सिद्धित्वममरत्वंचदास्य
त्वंचहरेरपि॥यदिस्यात्सिद्धकवचःसर्वंप्राप्नोतिनिश्चितं॥सप्त
वेत्सिद्धकवचोदशलक्षंजपेत्तुयः॥सोभवेत्सिद्धकवचःसर्वज्ञः
सभवेद्ध्रुवं॥इदंकवचमज्ञात्वाभजेत्कृष्णंसमंदधीः॥कोटि
कल्पप्रजप्तोपिनमंत्रंसिद्धिदायकः॥गृहीत्वाकवचंवत्समहीं

निःक्षत्रियांकुरु॥त्रिःसप्तकृत्वोनिःशंकःसदानंदोबलीमहान्॥रा
ज्यंदेयंशिरोदेयंप्राणादेयाश्चपुत्रक॥एवंभूतंचकवचंनदेयं
प्राणसंकटे॥ ॥इतिश्रीब्रह्मवैवर्त्तेमहापुराणेश्रीगणपति
खंडेश्रीनारायणनारदसंवादेकवचप्रदानंनामैकत्रिंशोध्या ॥८॥
यः॥ ॥३१॥ ॥श्रीगुरुरुवाच॥संप्राप्तंकवचंनाथराम्श्वत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वांगरक्षणं॥सुखदंमोक्षदंसारं शत्रुसंहारकारकं॥ अधुनाभगव
न्मंत्रंस्तोत्रंपूजाविधिंप्रभो॥ देहिमह्यमनाथायशरणागतपाल
क॥ श्रीमहादेवउवाच॥ ॐ नमः श्रीकृष्णायपरिपूर्णतमायच॥
स्वाहेत्यनेनमंत्रेणभजगोपीश्वरंप्रभुं॥ मंत्रेषुमंत्रराजोयंमहा
न्सप्तदशाक्षरः॥ सिद्धोयंपंचलक्षेणजपेनमुनिपुंगव॥ तद्द

शांशंचहवनंतद्दशांशाभिषेचनं॥ तर्पणंतद्दशांशंचतद्दशांशंच
भोजनं॥ सुवर्णानांचशातकंपुरश्चरणदक्षिणा॥ मंत्रसिद्धस्य[illegible]पुं स्य
सश्चविश्वंकरतलंमुने॥ सर्वेश्वरस्यकृष्णस्यभुक्तिमुक्तिप्रदाय
च॥ नवीननीरदश्यामंनीलेंदीवरलोचनं॥ शरत्पार्वणचंद्रा ॥२॥
स्यमीषद्धास्यमनोहरं॥ कोटिकंदर्पलावण्यलीलाधाममनोर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं॥ रत्नसिंहासनस्थं तं रत्नभूषणभूषितं॥ चंदनोक्षितसर्वांगं पी
तांबरधरं वरं॥ वीक्ष्यमाणं च गोपीभिः सस्मिताभिश्च संततं॥
प्रफुल्लमालतीमालावनमालाविभूषितं॥ दधतं कुंदपुष्पाढ्यां
चूडां चंद्रकचर्चितां॥ प्रेक्षांक्षिपंतीनंगसश्चंद्रतारान्वितस्य
च॥ रत्नभूषणसर्वांगराधावक्षःस्थलस्थितं॥ सिद्धेंद्रैश्च मु

नींद्रैश्च देवेंद्रैः परिसेवितं॥ ब्रह्मविष्णुमहेशैश्च श्रुतिभिश्च स्तुतं
भजे॥ ध्यानेनानेन तं ध्यात्वाचोपचाराणि षोडश॥ दत्वाभक्त्या
च संपूज्य सर्वज्ञत्वं लभेत्सुमान्॥ आद्यं पाद्यमासनं च वसनं भू
षणं तथा॥ गामर्घ्यं मधुपर्कं च यज्ञसूत्रमनुत्तमं॥ धूपदीपौ ॥१०॥
च नैवेद्यं पुनराचमनीयकं॥ नानाप्रकारपुष्पं च तांबूलं च सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासितं॥चंदनागुरुकस्तूरीदिव्यतुल्यमनोहरं॥भक्त्याभगव
तोदेयंमाल्यंपुष्पांजलित्रयं॥ततःषडंगंसंपूज्यपश्चात्संपूज्य
येद्दृशा॥आदामानंसुदामानंवसुदामानमेवच॥हरिभानंचं
द्रभानंसूर्यभानंसुभानकं॥पार्षदप्रवरान्सम्यक्पूजयेद्भक्ति
भावतः॥गोपीश्वरींराधिकांचमूलप्रकृतिमीश्वरीं॥कृष्णंचकृ

५ ष्णपूज्यांचपूजयेद्भक्तिपूर्वकं॥गोपगोपीगणेशांतांमांब्रह्माणं
चपार्वतीं॥लक्ष्मींसरस्वतींपृथ्वींसर्वदेवंनवग्रहं॥देवषट्कंस
मभ्यर्च्यपुरःपंचोपचारतः॥पश्चाद्देवंक्रमेणैवश्रीकृष्णंपूज
येत्सुधीः॥गणेशंचदिनेशंचवह्निंविष्णुंशिवंशिवां॥समभ्य ॥११॥
र्च्यदेवषट्कमिष्टदेवंचपूजयेत्॥गणेशंविघ्ननाशायव्याधिना

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाय भास्करं॥ आत्मनः शुद्धये वह्निं श्री विष्णु भक्ति हेतवे॥ ज्ञा
नाय शंकरं दुर्गां परमैश्वर्य्य हेतवे॥ संपूजने फलमिदं विपरीत
मपूजने॥ ततः कृत्वा परीहारमिष्टदेवं च भक्तितः॥ स्तोत्रं च साम
वेदोक्तं पठेद्भक्त्या च तत् शृणु॥ ॥श्री महादेव उवाच॥ परं ब्रह्म
परं धाम परं ज्योतिः सनातनं॥ निर्लिप्तं परमात्मानं नमामि स

र्वकारणं॥ स्थूलात्स्थूलतमं सूक्ष्मात्सूक्ष्मात्सूक्ष्मतरं परं॥ सर्वदि
श्यमदृश्यं तं स्वेच्छाचारं नमाम्यहं॥ साकारं च निराकारं सगुणं नि
र्गुणं प्रभुं॥ सर्वाधारं च सर्वं च स्वेच्छारूपं नमाम्यहं॥ अतीव क
मनीयं च रूपं निरूपमं विभुं॥ करालरूपमत्यंतं बिभ्रतं प्रणमा ॥१२॥
म्यहं॥ कर्मणः कर्मरूपं तं साक्षिणं सर्वकर्मणां॥ फलं च फलदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तारं सर्वरूपं नमाम्यहं ॥ स्रष्टा पाता च संहर्त्ता कलया मूर्त्तिभेदतः ॥
नानामूर्त्तिकलांशो नयः पुमांस्तं नमाम्यहं ॥ स्वयं प्रकृतिरूपश्च मा
यायाश्च स्वयं पुमान् ॥ तयोः परः स्वयं शाश्वत्तं नमामि परात्परं ॥ स्त्री
पुं नपुंसकं रूपं यो बिभर्त्ति स्वमायया ॥ स्वयं माया स्वयं मायी यो वेद
स्तं नमाम्यहं ॥ तारणं सर्वदुःखानां सर्वकारणकारणं ॥ धारणं सर्व

विश्वानां सर्वबीजं नमाम्यहं ॥ तेजस्विनां वह्निर्यो हि सर्वजातिषु ब्रा
ह्मणः ॥ नक्षत्राणां च यश्चंद्रस्तं नमामि जगत्प्रभुं ॥ रुद्राणां वैष्णवा
नां च ज्ञानिनां यो हि शंकरः ॥ नागानां यो हि शेषश्च तं नमामि जगत्प्र
तिं ॥ प्रजापतीनां यो ब्रह्मा सिद्धानां कपिलः स्वयं ॥ सनत्कुमारो मु
निषु तं नमामि जगद्गुरुं ॥ देवानां यो हि विष्णुश्च देवीनां प्रकृतिः स्व ॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं॥ स्वायंभुवो मनूनां च मानवेषु च वैष्णवः॥ नारीणां शतरूपा च व
ह्निरूपं नमाम्यहं॥ ऋतूनां यो वसंतश्च मासानां मार्गशीर्षकः॥ एकाद
शी तिथीनां च नमामि सर्वरूपिणं॥ सागरः सरितां यश्च पर्वतानां हि
मालयः॥ वसुंधरा महिम्नां तं सर्वं प्रणमाम्यहं॥ पत्राणां तुलसी
पत्रं दारुरूपे च चंदनं॥ वृक्षाणां कल्पवृक्षो यस्तं नमामि जगत्पतिं॥

पुष्पाणां पारिजातं च सस्यानां धान्यमेव च॥ अमृतं भक्ष्यवस्तूनां ना
नारूपं नमाम्यहं॥ ऐरावतो गजेंद्राणां वैनतेयश्च पक्षिणां॥ कामधे
नुश्च धेनूनां सर्वरूपं नमाम्यहं॥ तैजसानां सुवर्णं च धानानां धान्य
मेव च॥ यः केसरी पशूनां च वररूपं नमाम्यहं॥ यक्षाणां च कुबेरो ॥१५॥
यः ग्रहाणां च बृहस्पतिः॥ दिक्पालानां महेंद्रश्च तं नमामि वरं परं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदसंघाश्च शास्त्राणां पंडितानां सरस्वती॥ अक्षराणामकारो यस्तं
प्रधानं नमाम्यहं॥ मंत्राणां विष्णुमंत्रश्च तीर्थानां जाह्नवी स्वयं॥ इंद्रि
याणां मनो यो हि सर्वश्रेष्टं नमाम्यहं॥ सुदर्शनं च शस्त्राणां व्याधीनां
वैष्णवज्वरः॥ तेजसां ब्रह्मतेजश्च वरेण्यं च नमाम्यहं॥ निमेषकश्च
बलवतां मनश्च शीघ्रगामिनां॥ कालः कलयतां यो हि तं नमामि

विलक्षणं॥ ज्ञानदाता गुरूणां च मातरूपश्च बंधुषु॥ मित्रेषु जन
दाता यस्तं सारं प्रणमाम्यहं॥ शिल्पिनां विश्वकर्मा यः कामदेव
श्च रूपिणां॥ पतिव्रता यः पत्नीनां नमस्यं तं नमाम्यहं॥ प्रियेषु
पुत्ररूपो यो नृपरूपो नरेषु च॥ शालग्रामश्च यंत्राणां तं विशिष्टं
नमाम्यहं॥ धर्मः कल्याणजीवानां वेदानां सामवेदकः॥ धर्म्मा

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णांसत्यरूपोयस्तंविशिष्टंनमाम्यहं॥ जलेशैत्यस्वरूपोयोगंधरूप
श्चभूमिषु॥ शब्दरूपश्चगगनेतंप्रशस्यंनमाम्यहं॥ कृतनांराजसू
योयोगायत्रीछंदसांचयः॥ गंधर्वाणांचित्ररथस्तंगरिष्टंनमाम्यहं॥
क्षीरस्वरूपोगव्याणांपवित्राणांचपावकः॥ पुण्यदानांचयस्तोयं
तंनमामिशुभप्रदं॥ तृणानांकुशरूपोयोव्याधिरूपश्चवैरिणां॥

गणानांशांतिरूपोयश्चित्ररूपंनमाम्यहं॥ तेजोरूपोज्ञानरूप
सर्वरूपश्चयोमहान्॥ सर्वानिर्वचनीयंचतंनमामिस्वयंविभुं॥
सर्वाधारेषुयोवायुर्यआत्मानित्यरूपिणां॥ आकाशोव्यापका
नांयोव्यापकंतंनमाम्यहं॥ वेदेनिर्वचनीयंयत्तस्तोतुंपंडितः
क्षमः॥ यदनिर्वचनीयंचकोवातत्स्तोतुमीश्वरः॥ वेदानशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मायंस्तोतुं जडीभूतासरस्वती॥ तंचवाङ्मनसोःपारं कोविद्वांस्तो
तुमीश्वरः॥ शुद्धतेजः स्वरूपंचभक्तानुग्रहविग्रहं॥ अतीवक
मनीयंचश्यामरूपंनमाम्यहं॥ द्विभुजंमुरलीवक्त्रं किशोरंसस्मि
तंमुदा॥ शश्वद्गोपांगनाभिश्चवीक्ष्यमाणंनमाम्यहं॥ राधयाद
त्तताम्बूलं भुक्तवंतंमनोहरं॥ रत्नसिंहासनस्थंचतमीशं प्रण

माम्यहं॥ रत्नभूषणभूषाढ्यं सेवितंश्वेतचामरैः॥ पार्षदप्रवरै
गोपिकुमारैस्तंनमाम्यहं॥ वृंदावनांतरेरम्येरासोल्लाससमुत्सु
कं॥ रासमंडलमध्यस्थंनमामिरसिकेश्वरं॥ शतशृंगेमहा
शैलेगोलोकेरत्नपर्वते॥ विरजापुलिनेरम्येप्रणमामिविहा ॥१७॥
रिणं॥ परिपूर्णतमंशांतंराधाकांतंमनोहरं॥ सत्यंब्रह्मस्वरू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचनित्यं कृष्णेन मामप्यहं ॥ श्रीकृष्णस्य स्तोत्रमिदं त्रि संध्यं यः प
ठेन्नरः ॥ धर्म्मार्थकाममोक्षाणां सदा ताभारते भवेत् ॥ हरिदास्यं
हरौ भक्तिं लभेत्स्तोत्रप्रसादतः ॥ इहलोके जगत्स्रष्ट्यो विष्णुतु
ल्यो भवेद्ध्रुवं ॥ तेजसा यशसा भातियथा सूर्यो महीतले ॥ जीव
न्मुक्तः कृष्णभक्तः स भवेन्नात्र संशयः ॥ अरोगी गुणवान्विद्वा

न्पुत्रवान्धनवान्सदा ॥ षडभिज्ञो दशबलो मनोयायी भवेन्न
रः ॥ सर्वज्ञः सर्वदश्चैव सदाता सर्वसंपदां ॥ कल्पवृक्षसमः शश्व
द्भवेत्कृष्णप्रसादतः ॥ सर्वसिद्धेश्वरः शांतो प्यंते याति हरेः पदं ॥
इत्येवं कथितं स्तोत्रं त्वं गच्छ वत्स पुष्करं ॥ तत्र कृत्वा मंत्रसिद्धिं प ॥१८॥
श्चात्त्राप्स्यसि वांछितं ॥ त्रिः सप्तकृत्वो निर्भूपां कुरु पृथ्वीं यथासु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खं॥ममाशिषामुनिश्रेष्ठश्रीकृष्णस्यप्रसादतः॥ ॥इतिश्रीब्रह्म
वैवर्त्तेमहापुराणेश्रीगणपतिखंडेश्रीनारायणनारदसंवादेद्वा
त्रिंशोऽध्यायः॥३२॥ ॥श्रीकृष्णायनमः॥श्रीरामायनमः॥
शाके१६९० सर्वधारीनामसंवत्सरेमार्गशीर्षकृष्ण१३लिखि ॥१९॥
तमिदंयाज्ञिकोपनामकरामदूरविदत्तेनशुभंभूयात्॥ ॥

KKSU LIBRARY
RAMTEK
441 106
M-1818
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 17:12
,TRANSFERRED=2020/10/22 at 17:15:04
,PAGES=19
,TYPE=STD
,NAME=S0004439
,Book Name=M-1818-NARAYAN NARAD SANVAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection